# Shri Hanumat Samstava

# શ્રીહનૂમત્સંસ્તવઃ

## Document Information

Text title : Hanumatsam Stava

File name : hanUmatsaMstavaH.itx

Category : hanumaana, ApaTIkara

Location : doc_hanumaana

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# શ્રીહનૂમત્સંસ્તવઃ

(ભુજઙ્ગપ્રયાતમ્)

નમામ્યઞ્જનીનન્દનં વાયુપુત્રં
નમામિ પ્રભું વાનરાણાં ગણાનામ્ ।
સદા રામનામામૃતં સેવમાનં
નમામિ પ્રભું મારુતિં રામદૂતમ્ ॥ ૧॥

તડિત્તેજસં વાયુવેગં બલિષ્ઠં
ચિરઞ્જીવિનં દિવ્યવજ્રાઙ્ગદેહમ્ ।
દિતેઃ સન્તતિં સંહરન્તં કપીન્દ્રં
વરેણ્યં શરણ્યં નિતાન્તં ભજેઽહમ્ ॥ ૨॥

મહાસાગરં લીલયા લઙ્ઘયિત્વા
ત્વયાઽઽશ્વાસિતા ભૂમિકન્યા સશોકા
ત્વયા રાક્ષસેન્દ્રસ્ય લઙ્કા વિદગ્ધા
ત્વયૈતાદૃશી સ્વામિસેવા વિધત્તા ॥ ૩॥

ત્વદીયેન વેગેન તુલ્યો ન વાયુ-
ર્ન વા માનસં માનવાનાં કપીશ ।
સુમિત્રાસુતપ્રાણરક્ષાર્થમેવ
ગિરીન્દ્રાગ્રમુત્પાટ્ય વેગેન નીતમ્ ॥ ૪॥

વરિષ્ઠા વદાન્યાઽસ્તિ સેવા ત્વદીયા
પ્રભૂ રામચન્દ્રસ્ત્વયૈવ પ્રસન્નઃ ।
ત્વમેવાસિ ચાદર્શભૂતો નરાણાં
ભવત્પાદપદ્મં સદા વન્દનીયમ્ ॥ ૫॥

ત્વમેવાગ્રણીધીર્વરાણાં નરાણાં
ત્વમેવાસિ નેતા બલોપાસકાનામ્ ।
ભુભુઃકારનાદેન રક્ષઃ સમૂહાસ્

ત્વયા નાશિતા વાનરેન્દ્રેણ સર્વે ॥ ૬॥

દશાસ્યસ્ય કીર્તિં વિનાશં નયન્તં
સુદીનાઞ્ જનાંસ્તારયન્તં કપીન્દ્રમ્ ।
પ્રભો રામચન્દ્રસ્ય ભક્તાનવન્તં
હનૂમન્તમેકં સ્મરામિ પ્રભાતે ॥ ૭॥

અહઙ્કારયુક્તશ્ચ વિદ્યામદાન્ધઃ
સદા દ્રવ્યલુબ્ધોઽહમક્રોધહીનઃ ।
મહામોહયુક્તે ભવેઽસ્મિન્નિમગ્નં
હનૂમન્ હતાશં જનં પાહિ નિત્યમ્ ॥ ૮॥

ઇમં સંસ્તવં રામદૂતસ્ય રમ્યં
પઠેત્ સાદરં યો નરો ભક્તિયુક્તઃ ।
સમસ્તાનિ દુઃખાનિ નીત્વા વિનાશં
ભવેત્તસ્ય વાતાત્મજઃ સૌખ્યદાતા ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતઃ શ્રીહનૂમત્સંસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Hanumat Samstava*
pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*